दिनाङ्क : 19.09.2025 सायम् - 06:20

## आदौ-मुख्यवार्ता:

- प्रधानमन्त्रिणा नरेन्द्रमोदिना अद्य ग्रीस्-देशस्य प्रधानमन्त्रिणा किरियाकोस् मित्सोताकिस इत्यनेन सह दूरभाष-माध्यमेन चर्चा कृता। उभौ भारत-ग्रीस्-सामरिकसहभागित्वम् अपि च क्षेत्रीयजनानां समृद्ध्यै च स्वप्रतिबद्धतां पुनः दृढीकृतवन्तौ।
- भारतेन सीमापार-आतङ्कवादं निवारणाय आह्वानं ,नेपालदेशे सुशीला कर्की इत्यस्याः नेतृत्वे नूतनस्य अन्तरीमशासनस्य निर्माणस्य स्वागतं च कृतम्।
- केन्द्रीयकृषि-कृषक कल्याण-मन्त्री शिवराज सिंह चौहानः अद्य उक्तवान् यत् ट्रैक्टर-वाहनानां कृषि-उपकरणानां च जी. एस्. टी.-मूल्यस्य ह्रासः प्रत्यक्षतया कृषकाणां कृते लाभप्रदः भवेत्।
- प्रसिद्धः असम राज्यस्य गायकः सांस्कृतिक-प्रतीकः च ज़ुबीन गर्ग इत्येषः सिङ्गापुर्-नगरे स्कूबा-डैविङ्ग्-दुर्घटनायाः अनन्तरं मृतः।
- एशिया-कप-क्रिकेट-प्रतिस्पर्धाम् अद्य सायम् अबूधाबी-नगरस्य ज़ायेद-क्रिकेट- क्रीडाङ्गणे भारतीय-दलं स्वस्य अन्तिमायां ग्रुप-'ए' इत्यस्यां स्पर्धायाम् ओमान-देशेन सह स्पर्धिष्यति।

## अथ वार्ताः विस्तरेण

### ग्रीस्-देशे

प्रधानमन्त्रिणा नरेन्द्रमोदिना अद्य ग्रीस्-देशस्य प्रधानमन्त्रिणा किरियाकोस् मित्सोताकिस इत्यनेन सह दूरभाष-माध्यमेन चर्चा कृता। वार्तालापावधौ उभौ नेतारौ भारत-ग्रीस्-सामरिकसहभागित्वम् अपि च क्षेत्रीयजनानां समृद्ध्यै च स्वप्रतिबद्धतां पुनः दृढीकृतवन्तौ। व्यापार, निवेश, प्रौद्योगिकी, नौवहन, रक्षा, सुरक्षा, सम्पर्क, जनसम्पर्क इत्यादिषु क्षेत्रेषु द्वैपाक्षिकसम्बन्धेषु विकासस्य स्वागतम् कृतवन्तौ। उभौ नेतारौ परस्पर-हितानां क्षेत्रीय-वैश्विक-विषयाणां विषये अपि विचारानां आदानप्रदानं कृतवन्तौ। एतदतिरिच्य, प्रधानमन्त्री मित्सोताकिस-वर्यः षड्विंशत्यधिक द्विसहस्रतमे वर्षे भारते आयोजिते ए.आई. इम्पैक्ट् शिखर सम्मेलनस्य सफलतायै च समर्थनं प्रदत्तवान्।

### पोषण 2.0

प्रधानमन्त्रिणा नरेन्द्रमोदिना प्रोक्तं यत् 'मिशन सक्षम-आङ्गनवाडी' एवं 'पोषण- द्वि-दशमलव-शून्यं इत्येते योजने बालकानां, कन्यानां गर्भवती-महिलानां च पोषणं सम्वर्धनाय सर्वकारस्य प्रमुखाभियाने स्तः। केन्द्रीयमन्त्रिणः अन्नपूर्णादेव्याः लेखं विनिमयी कुर्वन् श्रीमोदी अवदत् यत् एताभिः योजनाभिः देशे आङ्गनवाडी-केन्द्राणां व्यापक-सञ्चालेन लक्षाधिकाः लाभार्थिनः लाभान्विताः सन्ति।

### विदेश मंत्रालय:

आतंकवादस्य सर्वप्रकाराणां अभिव्यक्तयः निवारणाय प्रयासान् सुदृढं तीव्रतरं च कर्तुं भारतं विश्वं समाह्वयत्। भारतेन उक्तं यत्, आतङ्कवादिनां पाकिस्तानस्य सैन्यस्य च मध्ये सम्बन्धस्य विषये सर्वे जानन्ति। नवदिल्ल्यां वार्ताहरान् संबोधयन् पाकिस्तानस्य आतङ्कि-सङ्घटनानां नवीनतम-वीडियो प्रसङ्गे प्रश्नस्य उत्तरे, विदेशमन्त्रालयस्य प्रवक्ता रणधीर् जायसवालः अवदत् यत्, एतादृशाः घटनाः इतोप्यधिकं भयं जनयन्ति। सहैव श्री जायसवाल: प्रोक्तवान् यत् भारतं नेपालदेशे सुशीला कर्की इत्यस्याः नेतृत्वे नूतनस्य अन्तरिम-शासनस्य निर्माणस्य स्वागतम् करोति।

### अश्विनी-वैष्णवः

केन्द्रीय-सूचना- प्रौद्योगिकी-मन्त्री अश्विनी-वैष्णवः अवदत् यत् प्रधानमन्त्रिणा नरेन्द्रमोदिना तन्त्रज्ञानं भारतस्य बृहत्तमं समानरूपेण परिवर्तितम्। सः अवदत् यत् अधुना सामान्य-विक्रेतारः कार्पोरेट्-कार्यकारिणः इव एव यू. पी. आई. देय-व्यवस्थाम् उपयुञ्जते। राष्ट्रिय-दैनिक पत्रस्य एकस्मिन् लेखे, श्री वैष्णवः अधोरेखितवान् यत् तन्त्रज्ञानस्य कोपि पदानुक्रमः न भवति। सः अवदत् यत् एतत् परिवर्तनं प्रधानमन्त्रिणः मोदिनः अन्त्योदयस्य मूलदर्शनं प्रतिबिम्बयति। अन्तरिक्षस्य नवान्वेषणस्य च क्षेत्रस्य उल्लेखं कुर्वन् श्री वैष्णवः अवदत् यत् भारतेन यत् असाध्यम् प्रतीयते तदपि साधितम्।

**किरेन रिजिजूः**

केन्द्रीयसंसदीयकार्यमन्त्री किरेन रिजिजूः अवदत् यत् सप्तचत्वारिंशदधिक द्विसहस्र वर्षपर्यन्तं विकसितभारतस्य सङ्कल्पं साधयितुं महिलानां यूनां च सक्रियसहभागित्वं आवश्यकम्। नवदिल्ल्याः फ्यूचर्-फ्रंटियर्-कान्क्लेव्-इत्यत्र जनसमूहं सम्बोधयन् श्री रिजिजुः अवदत् यत् प्रशासनस्य कार्यसूच्याः केन्द्रित-विषयः अस्ति महिला-नेतृत्वस्य विकासः। श्री रिजिजूः अवदत् यत्, भारतं विश्वस्य तृतीयं बृहत्तमार्थव्यवस्थां भवितुं सम्यक् मार्गे अस्ति। मन्त्री उक्तवान् यत् गत एकादशवर्षेषु भारतं एकादशतम-स्थानात् विश्वस्य पञ्चमी बृहत्तमार्थव्यवस्था अभवत्। श्री रिजिजूः अवदत् यत् प्रधानमन्त्रिण: नरेन्द्रमोदिनः नेतृत्वे भारते महती प्रगतिः अभवत्।

**शिवराज- जीएसटी**

केन्द्रीयकृषि-कृषक कल्याण-मन्त्री शिवराज सिंह चौहानः अद्य उक्तवान् यत् ट्रैक्टर-वाहनानां कृषि-उपकरणानां च जी. एस्. टी.-मूल्यस्य ह्रासः प्रत्यक्षतया कृषकाणां कृते लाभप्रदः भवेत्। नवदिल्ल्यां कृषि-यन्त्राणां उपकरणानां च प्रतिनिधीनां सभायाः अध्यक्षतां कुर्वन् श्री चौहानः अवधानं दत्तवान् यत् जी. एस्. टी. इत्यस्य द्वादश अथवा अष्टादश प्रतिशतात् पञ्च प्रतिशतं यावत् न्यूनीकरणेन ट्रैक्टर-वाहनानां मूल्यं बहु न्यूनं भविष्यति । श्री चौहानः अवदत् यत् अनेन उपक्रमेण विभिन्न-ट्रैक्टर-वाहनेषु त्रयोविंशति त्रिषष्ठिः वा सहस्र रूप्यकाणि यावत् मुल्येषु ह्रासः भविष्यति। वार्ताहरान् सम्बोधयन्, श्री चौहानःउक्तवान् यत्, कृषकेभ्यः लाभः अस्य सितम्बर-मासस्य द्वाविंशति दिनाङ्कात् आरभ्य प्रत्यक्षतया भविष्यति।

**ज़ुबीन् गर्ग् मृतः-**

प्रसिद्धः असम-राज्यस्य गायकः सांस्कृतिक-प्रतीकः च ज़ुबीन गर्ग इत्येषः सिङ्गापुर्-नगरे स्कूबा-डैविङ्ग्-दुर्घटनायाः अनन्तरं मृतः। प्रतिवेदनानुसारं सिङ्गापुर्-देशस्य आरक्षकाः अचेतनावस्थायां समुद्रात् तं निष्कासितवन्तः, तस्मै स्थानीय-चिकित्सालयं प्रति नीतवन्तः। तीव्रपरिचर्यायां स्थापनानन्तरं सः मृतः। ज़ुबीन् इत्येषः नार्थ् ईस्ट् फ़ेस्टिवल् इत्यस्मिन् भागं ग्रहणाय सिङ्गापुर्-देशं गतवान् आसीत्, यत्र सः अद्य प्रदर्शनं कर्तुम् नियतः आसीत्। षडाधिक-द्विसहस्र तमे वर्षे गैग्स्टर् इति चलच्चित्रस्य "या अली" इति गीतेन ज़ुबीन् गर्ग् इत्येष: बालिवुड्-मध्ये प्रसिद्धिम् अवाप्नोत्।

**यमन-हूती**

यमन-देशस्य हूती-समूहेन इस्रायेल्-देशस्य नगराणि लक्ष्यीकृत्य हैपर्सोनिक्-बैलेस्टिक्-प्रक्षेपणस्य, त्रयाणां ड्रोन्स्-प्रक्षेपणास्त्राणां च दायित्वं स्वीकृतम्। हूती सूत्रानुसारं, प्रक्षेपणास्त्रेण जाफा-नगरस्य सैन्यस्थलं, ड्रोन्स्- क्षेपास्त्रेण बीर्-शेवा-नगरं, ईलात-पत्तन-नगरं च लक्ष्यीकृतम्। इस्रायेल्-देशस्य रक्षाबलेन अधिकांशप्रक्षेपणास्त्राणि अवरोधितानि परञ्च ईलात-नगरे ड्रोन-प्रहारः अभवत्, येन सम्पत्तिनां क्षतिः जाता, न कापि जनहानिः अभवत्।

**एशिया-कप**

एशिया-कप-क्रिकेट-प्रतिस्पर्धायां अबूधाबी-नगरस्य ज़ायेद-क्रिकेट- क्रीडाङ्गणे भारत-दलं स्वस्य अन्तिमायां ग्रुप-'ए' इत्यस्यां स्पर्धायाम् ओमान-देशेन सह स्पर्धिष्यति। एषा स्पर्धा रात्रौ अष्टवादने आरप्स्यते। ओमान-देशः पूर्वमेव बहिर्भूतः। भारत-दलं द्वयोः प्रतिस्पर्धयोः चतुर्भिः अङ्कैः सह 'सुपर–फोर' इत्यस्मिन् स्थानं प्राप्तवत् ।

।इति वार्ताः ।।